**Ex/Sans/PG/3.5C/75/2017**

# MASTER OF ARTS EXAMINATION, 2017

(2nd Year, 3rd Semester)

## SANSKRIT

### Course : XV/ C

### [ Navya Nyāya and Buddhist Logic ]

Time : Two Hours — Full Marks : 30

*The figures in the margin indicate full marks.*

सर्वे प्रश्नाः सुरगिरा नागरीलिप्या च समाधेयाः।

१। अधोलिखितयोरन्यतरः प्रश्नः समाधेयः— 6

(क) साध्याभाववदवृत्तित्वमित्यत्र वृत्तित्वाभावस्य वृत्तित्वसामान्याभावत्वकथनस्य फलं वर्ण्यताम्।

(ख) किं प्रयोजनं नाम व्याप्तिपञ्चकगतं द्वितीयं लक्षणम्? द्वितीयं लक्षणं समुल्लिख्य सदनुमाने तस्य सङ्गतिः, असदनुमाने चासङ्गतिः प्रदर्शनीये।

२। व्याप्तेः स्वरूपं निर्णीय तस्य लक्षणान्तराश्रयणे किं बीजमिति सोदाहरणं मुक्तावलीदिशा प्रतिपाद्यताम्। 6

**अथवा,**

हेत्वाभासलक्षणमुल्लिख्य अनैकान्तिकहेत्वाभासभेदाः सोदाहरणमालोच्यन्ताम्।

[*Turn over*]

३। शक्तिग्रहोपाया मुक्तावलीरीत्या संक्षेपेण सोदाहरणमालोच्यन्ताम्। 6

**अथवा,**

शाब्दबोधे आसत्तियोग्यताज्ञानयोरुपयोगिता प्रसाध्यताम्।

४। किं तावद् बौद्धनये स्वार्थानुमानम्, किं च परार्थानुमानम्? तयोर्विशेषः प्रपञ्चेन निर्वर्ण्यताम्। 6

**अथवा,**

लिङ्गस्य त्रैरूप्यं विशदं विचार्यताम्।

५। अधोलिखितेषु **षण्णां** समाधानमर्हति— 1×6=6

(क) धर्मकीर्त्तिमते कस्तावद् भवत्यनुमेयः?

(ख) बौद्धमते कानि प्रमाणानि स्वीकृतानि?

(ग) 'साध्यवदन्यस्मिन्नसंबन्धः' इति विश्वनाथीयेन व्याप्तिलक्षणे व्याप्तिपञ्चकगतं कतमं लक्षणमनुकृतम्?

(घ) 'न तावद् अव्यभिचरितत्वम्' — इति चिन्तामणिवाक्यं समासत उपस्थाप्यताम्।

(ङ) साध्याभाववदवृत्तित्वम् इत्यत्र समासो निरूप्यताम्।

(च) पक्षतालक्षणं मुक्तावलीदिशा लिख्यताम्।

(छ) मुक्तावलीग्रन्थे संख्याभिधानयोग्यशब्देन कीदृशार्थो बोधितः?

(ज) सत्प्रतिपक्षस्य उदाहरणं लिख्यताम्।

(झ) शाब्दबोधे पदज्ञानस्य करणत्वं कथमभिहितं तदुच्यताम्।

(ञ) विश्वनाथमते परामर्शलक्षणं किम्?